# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥


## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।**

ईश्वरसङ्कल्पं प्रति पूर्णतया समर्पणमेव भक्तिः। ईशस्मरणम् अस्माभिः तैलधारावत् निरन्तरं कर्तव्यम् । एतत् सर्वं केवलं गुरुकृपया एव शक्यम् ।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

यावत् गुरोः निर्दिष्टोपदेशः परिगृह्यते तावत् वाचि चित्ते कर्मणि च शुद्धिः अचिरात् परिणयते।

गुरूपदेशानुवादः – दुर्गा कुम्टा , मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

सद्यः एव एका लघुकथा मम दृष्टिपथम् आगता।

एकः पदाती यात्रिकः यात्रासामग्रीभारं ऊढ्वा अपरिचितग्रामं गन्तुं मार्गक्रमणं कुर्वन् आसीत् । बहुसमयः व्यतीतः किन्तु सः ग्रामः न प्राप्तः तेन । किञ्चित् दूरं तेन शिलायाम् उपविष्टः एकः साधुः दृष्टः। साधोः समीपं गत्वा तस्मै कर्गजं दर्शयित्वा यात्रिकः पृष्टवान्," अयं ग्रामः इतः कियत् दूरम् अस्ति तथा तं प्राप्तुम् इतः कियान् समयः आवश्यकः , भवान् वक्तुं शक्नोति वा?"साधुः किमपि न उक्त्वा यात्रिकं मार्गक्रमणं कर्तुं सूचयित्वा तेन सह स्वयम् अपि चलितुं प्रारम्भं कृतवान्।

विस्मितः यात्रिकः तम् उक्तवान् ," भोः , भवान् मया सह मार्गक्रमणस्य कष्टं मा करोतु । अहं तु केवलं ग्रामस्य दूरतां ज्ञातुम् इच्छामि । स्वयमेव गन्तुं समर्थः अस्मि अहम् । " तथापि साधुः मौनं धृत्वा तेन सह चलन् आसीत्।पञ्चदशनिमिषादनन्तरं मार्गे सहसा विरम्य साधुः अवदत् ," भवान् होराद्वयात् इष्टस्थानं

"अधुना किञ्चित् किङ्कर्तव्यमूढः यात्रिकः पृष्टवान् ," भवान् इदं पूर्वम् एव वक्तुं शक्तवान् आसीत् किल? किमर्थं मया सह मार्गक्रमणस्य कष्टं कृतवान् भवान् ? "साधुः सस्मितम् उक्तवान् , " गन्तव्यस्थानप्राप्त्यर्थम्

आवश्यकसमयः चलनस्य वेगे निर्भरः भवति। स्थानस्य दूरता न महत्त्वपूर्णा।

पुनः यदि प्रवासः विनाभारं भवति तर्हि शीघ्रं भवति स्थानप्रापणम्। भवता सह चलित्वा एव अहं समयस्य अनुमानं कर्तुं शक्तवान्।"

अस्मिन् जगति प्रत्येकव्यक्तिः भिन्नः, तस्य प्रगल्भता, जिज्ञासा, ग्रहणशक्तिः अपि च भिन्ना एव। यदा गुरुः साधकस्य उत्तरदायित्वं स्वीकरोति तदा सः साधकस्य सामर्थ्यं परिमितिं च परिशील्य तस्य अभिवृद्ध्यर्थं प्रतिक्षणं मार्गदर्शनं करोति, पथच्युतेः तस्य संरक्षणं करोति च। साधकस्य आध्यात्मिकप्रगतेः सुनिश्चिततां प्रति गुरुः कटिबद्धः भवति।

चिन्ता-भय-आतति-आशङ्कानां भारं विहाय गुरुवर्यैः दर्शितमार्गं श्रद्धया अनुसृत्य साधनापथे अस्माकं मार्गक्रमणं भवेत्, अस्माकं जीवनं च संविन्मयं भवेद् इति श्रीचरणेषु प्रार्थना।

**गुरौ न प्राप्यते यत्तत् नान्यत्रापि हि लभ्यते।**

**गुरुप्रसादात् सर्वं तु प्राप्नोत्येव न संशयः॥**

गीर्वाणपत्रिकायाः इदं चतुर्थ-पुष्पं श्रीगुरुचरणकमलयोः हृत्पूर्वकं समर्पयामः।

– सम्पादिका

## चिन्तनम्

**– वृन्दा चन्दावर, मुम्बई**

अधोनिर्दिष्टं सुभाषितम् अधिकृत्य गत-सप्टम्बर् - मासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने बहवः सदस्याः सहभागं गृहीतवन्तः। सर्वैः प्रकटितानां स्वमतानां सारांशः अधः दीयते।

आचारः कुलमाख्याति

वपुराख्याति भोजनम्।

वचनं श्रुतिमाख्याति

स्नेहमाख्याति लोचनम्॥

१. कस्यापि वर्तनं, चलनं च तस्य पूर्वसंस्कारान् दर्शयतः। बाल्यावस्थायां मातृपितृभ्यां, शिक्षकैः, सहपाठिभिः, परिवेशिभिः, समाजेन, सज्जनैः तथा गुरुवर्यैः प्रदत्ताः संस्काराः भाविजीवनस्य प्रतिबिम्बम् अस्ति। ये सदाचारिणः सन्ति ते एव सर्वत्र आदरं लभन्ते।

**अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।**

**अनुग्रहश्च दानं च , सदाचार एषो विदुर्बुधाः।।**

सदाचारिणः कर्मणा मनसा वाण्या द्वेषरहितं भूत्वा सर्वभूतेषु अनुग्रहं दानं च कुर्वन्ति ।

२. व्यक्तेः अङ्गयष्टिं दृष्ट्वा तस्य आहार-विहारयोः विषये कल्पनां कर्तुं शक्यते ।

यथा आहारः तथा विचाराः । यथा विचाराः तथा आचाराः । आहाराः इत्युक्ते केवलं भोजनं न । सर्वैः ज्ञानेन्द्रियैः यत् गृहीतं तस्य सर्वस्य अस्माकं शरीरे परिणामः दृश्यते । तथैव यः भोजनं पचति तस्यापि परिणामः ग्राहकस्य शरीरे तथा मनसि भवति । यथा अन्नं तथा मनः । शरीरमाद्यं खलु धर्मसाधनम् ।

३. यत् अस्माभिः श्रुतं तस्य सञ्चयस्य अन्ततो गत्वा परिणामः अपि अस्माकं मनसि भवति । तदेव अस्माकं मुखात् उद्गच्छति । अतः कस्यापि वचनानि श्रुत्वा सः कीदृशानि वचनानि शृणोति , तस्य मित्रपरिवारः कीदृशः अस्ति एतस्य कल्पनां कर्तुं शक्यते । तस्मात् एषा प्रार्थना --

**येषां परं न कुलदैवतमम्बिके त्वम् ।**

**तेषां गिरा मम गिरो न भवतु मिश्राः ।।**

मम वाण्याः सम्बन्धः दुर्जनानां वाण्या सह न भवेत् , तेषां वाण्यां मम वाणी मिश्रिता न भवेत् इति आशयः ।

४. नेत्रे तु स्वभावस्य दर्शके एव । मनुष्यस्य भावाः तस्य नेत्राभ्यां प्रकटिताः भवन्ति । यद्यपि वाक्प्रयोगः न भवति तथापि मनसः विचाराः तस्य नेत्राभ्यां ज्ञायन्ते ।

एवम् आचाराः कुलस्य , अङ्गयष्टिः भोजनस्य , वचनं श्रुत्याः तथा लोचनं तु मनसः द्वाराणि एव सन्ति ।

## सुभाषितम्

**- लीना शाह , मुम्बई**

**सर्पाः पिबन्ति पवनं न च दुर्बलास्ते**
**शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।**
**कन्दैः फलैः मुनिवराः क्षपयन्ति कालं**
**सन्तोष एव पुरुषस्य परं निधानम् ।।**

**भावार्थः -**

केवलं वायुं पीत्वा अपि सर्पाः दुर्बलाः न भवन्ति। शुष्कतृणभक्षणं कृत्वा अपि वनगजाः शक्तिशालिनः । कन्दफलानां सेवनं कृत्वा एव ऋषयः कालं यापयन्ति। सन्तोषमेव सर्वेषां परं निधानम् ।



## श्रीवल्लीभुवनेश्वरीस्तुतिः

**– वृन्दा चन्दावर , मुम्बई**

प्रभाते सदा स्मर्या श्रीचित्रापुरवासिनी ।
श्रीभुवनेश्वरी सारस्वतजनस्वामिनी ॥

भक्तदुःखनिवारिणी शुभाशिषदायिनी ।
भक्तहृदयवासिनी भवार्णवतारिणी ॥

षड्रिपुविनाशिनी स्वर्गमुक्तिप्रदायिनी ।
हृदयाब्जह्रींमयी विपत्सागरतारिणी ॥

विश्वार्तिहारिणी जननी भक्तसुरक्षिणी ।
तवाङ्घ्रिकमले सदा वसतु चित्तं मे वरदायिनि ॥

## धर्मदीपो विजाग्र्यताम्

**– नारायण शिराली , मुम्बई**

निबिडतिमिरे मग्ना रात्रिकाले वसुन्धरा ।
शान्तिः सर्वत्र सम्भूता भुवनेऽस्मिन् समावृता ।
नीडेषु विहगाः सुप्ताः निद्रासुखमवाप्नुवन् ।
प्रभूतेनान्धकारेण न किञ्चिद् दृष्टिगोचरम् ॥ १॥

एवं रात्रौ गते सूर्यः पूर्वाचलं समागतः ।
ईषद् दृष्ट्वारुणं प्रेष्य तिमिरस्य विनाशकः ।
उषःकालः समुद्भूतः पूर्वदृक् प्रेमलज्जिता ।
तमोज्ञानान्धकारस्य विनाशं कृतवान् तदा ॥ २ ॥

उद्यत्भास्करसङ्काशान् द्वैताभ्रवहनीकृतान् ।
भक्तिप्रेमसमाविष्टान् वेदान्तस्मृतिपारगान् ।
सदानन्दं प्रसृयन्तान् जितसाधकमण्डलान् ।
वन्दामहे चिदानन्दान् धर्मरक्षणतत्परान् ॥ ३ ॥

सद्योजातशङ्कराश्रमाः साधकानां बहुप्रियाः ।
भक्तवृन्दान् उपागम्य बहु सम्मानिता जनाः ।
विमर्शयोगे कृत्वा तु आशीर्वचांसि प्रदाय च ।
भजने पूजने रक्ताः कृता भक्त्यां जनाः रताः ॥ ४ ॥

अचला क्रियतां भक्तिः अस्माकं नित्यपाठिनाम् ।
साधयितुं गुणोत्कर्षं भक्तिमार्गेण प्रस्थितान् ।
सुधीन् विधीयतान् अस्मान् सेवाभावानुसारिणः
विवेकभक्तिवैराग्यैः धर्मदीपो विजाग्र्यताम् ॥ ५॥

# सत्यकाम- जाबालः

– वैशाली कोप्पीकर , मुम्बई

कः ब्राह्मणः? ब्रह्म , वेदं , शुद्धं , चैतन्यं वा वेत्ति अधीते वा इति ब्राह्मणः । सः सत्यव्रतम् आचरति । ब्राह्मणः इति विशेषणम् । को वा ब्रह्मचारी ? ब्रह्मणि चरतीति ब्रह्मचारिन् । वेदाध्ययनशीलः , इन्द्रियनिग्रही, आत्मसंयमी , कुमारः , शिष्यवृत्त्या धार्मिकः , विरतः च ब्रह्मचारी स्यात् । ब्राह्मण्यं समाजस्य एका अविभाज्या आचरणपद्धतिः अस्ति । गुरुकुलपरम्परागतया एतया संस्कृत्या एव इतोऽपि वेदकालीनसुसंस्कृतिः किञ्चन रक्षिता वर्तते ।

सुदृढ-सौहार्दपूर्ण-समरस-नीतिमत्-एकात्म-संयमित-उपभोगयुक्त-समाजस्य रचनायां ब्राह्मण-गुरुशिष्य -परम्परा महत्त्वाधायिनी वर्तते ।

एवमेव उच्चविचारयोः गुरुशिष्ययोः कथा अस्ति एषा , सत्यकाम - जाबालस्य कथा । छान्दोग्योपनिषदः चतुर्थ-अध्यायस्य चतुर्थखण्डात् उद्धृता अस्ति ।

आसीत् पुरा एकः बालकः । ब्रह्मचर्यव्रतकामः सः एकस्मिन् दिने मातरं पृष्टवान् , " को मे तातः ? " इति। उत्तरवादिनी सा ," नाहं वेद्मि यद् को गोत्रो त्वमसीति । यौवने बहु चरन्ती अहं त्वाम् अलभे । अहं जबाला , त्वं तु सत्यकामः । अतः सत्यकामो जाबालेति जानीहि " इति ।

सोऽपि गुरुम् अन्विष्यन् हारिद्रुमत - गौतमं प्राप्तवान् । गुरुणा किं गोत्रो त्वमिति पृष्टे सति मात्रा यदुक्तं तदेव नम्रतापूर्वकं निवेद्य स्थितवान् । विवेकपूर्णः गुरुरपि ब्राह्मणः एव सत्यकथनार्हः इति विचिन्त्य सत्यकामः जाबालः ब्राह्मणः इति निर्णीय समिधः आनेतुम् आदिष्टवान् तम् उपनीतवान् च । कदापि सत्यात् भ्रष्टो मा भवेति उपदिश्य ब्रह्मोपदेशं कृतवान् ।

पश्चाद् गुरुणा चतुश्शतगवां यूथं प्रदाय पालयित्वा सहस्रगवां यूथं गृहीत्वैव आगन्तुम् आदिष्टः । पशुपालनसमये एषः ऋषभाग्निहंसादिभिः सम्भाष्य ब्रह्मज्ञानं प्राप्तवानिति अपि श्रूयते । जाबालोपनिषदः प्रणेता अयं संन्यासाश्रमोपरि ग्रन्थमपि रचितवानस्ति।

# काव्यशास्त्रविनोदाः

**– सानिका बळवळ्ळी, मुम्बई**

काव्य-शास्त्र-विनोदाः - जानन्ति वा एतेषां शब्दानाम् अर्थम् ?

पुरातनसमये नृपसभायां बहवः कवयः आसन् । नृपः तेभ्यः कविभ्यः एकाम् उपहूतिं ददाति स्म । नृपः एकं वाक्यं कथयति स्म । तं वाक्यम् उपयुज्य कवयः काव्यं रचयन्ति स्म । सा आसीत् समस्यापूर्तिः ।

एकदा धारानगर्याः नृपः "मृगात् सिंहः पलायते" इति एकं वाक्यं कविभ्यः दत्तवान् , योग्यशब्दान् पूरयित्वा काव्यं रचयितुं कथितवान् । अशक्यं किल? परन्तु त्रय: कवय: "एतत् कार्यं करिष्याम:" इति अवदन् ।

एकः कविः उक्तवान्–

**असमाने समानत्वं भविता कलहे मम ।**
**इति मत्वा ध्रुवं मानी मृगात् सिंहः पलायते ॥**

द्वितीयः कविः उक्तवान्–

**तिष्ठार्जुन अद्य त्वां हनिष्यामि ध्रुवं रणे ।**
**तिष्ठामि कर्ण किं मूढ मृगात् सिंहः पलायते ॥**

तृतीयः कविः उक्तवान्–

**कस्तूरी जायते कस्मात् को हन्ति करिणां शतम् ।**
**किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायते ॥**

एतत् अस्ति काव्यम् ।

संस्कृतकाव्ये बहूनि उदाहरणानि सन्ति, यानि अस्मान् बोधयन्ति यत् जीवनं कथं जीवेम । एतत् अस्ति शास्त्रम् । काव्यशास्त्रविनोदाः जीवनस्य मूल्यम् उदाहरणैः सह प्रतिपादयन्ति ।

**लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।**
**प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत् ॥**

पञ्चवर्षपर्यन्तं मनुष्यः पुत्रं लालयति । तदनन्तरं दशवर्षपर्यन्तं सः यदा आवश्यकं तदा पुत्रं ताडयितुं शक्नोति । यदा सः पुत्रः युवकः भवति, तदा मनुष्य: तेन सह मित्रवत् आचरति ।

संस्कृतकाव्ये प्राणिनः दोषाः अपि दुर्गुणाः इव न मन्यन्ते किन्तु एते विनोदरूपेण प्रस्तुताः सन्ति ।

**उष्ट्राणाञ्च गृहे लग्नं गर्दभाः शान्तिपाठकाः ।**
**परस्परं प्रशंसन्ति अहो रूपम् अहो ध्वनिः ॥**

एकदा उष्ट्राणां गृहे लग्नम् आसीत् । वस्तुतः उष्ट्राः न सुरूपा: न तु गर्दभाणां स्वरः मधुरः । परन्तु ते परस्परं प्रशंसन्ति, यतः ते जानन्ति, कोऽपि अन्यः तेषां प्रशंसां न करोति । एषः अस्ति विनोदः ।

**काव्य-शास्त्र-विनोदेन कालो गच्छति धीमताम् ।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥**

धीमतां कालः काव्यशास्त्रविनोदेन गच्छति । मूर्खाणां च कालः व्यसनेन, निद्रया, कलहेन वा गच्छति ।

एतानि उदाहरणानि नवमी-कक्षायाः संस्कृत-तरङ्गिणी-पुस्तकात् स्वीकृतानि ।

## अहं मुरली

**– अनुराधा कर्पे, पालघर**

अहं मुरली ! आम् , भगवत: श्रीकृष्णस्य परमप्रियं वाद्यम् ! कियती भाग्यवती अहम् !

एकदा श्रीकृष्णस्य सर्वा: सख्य: गोपिका: मह्यं कुपितवत्य: । तेषां दु:खनिवेदनम् आसीत् यत् ता: सदैव श्रीकृष्णस्य समीपे एव वर्तन्ते । तस्य कृते गायन - नृत्यादि कृत्वा तस्य मनोरञ्जनम् अपि कृत्वा स: प्रसन्न: भवतु इति प्रयतन्ते । श्रीकृष्णे तेषां स्तुतिसुमनवर्षा च भवति । किन्तु गोपिकाः प्रति तस्य प्रतिक्रिया किञ्चित् उदासीना एव दृश्यते ।

" वयं रूपयौवनसम्पन्ना: , सर्वकलासु पारङ्गता: , उच्चकुलविभूषिता: स्म: । हे मुरलि, त्वं का ? तव का विशेषता ? सामान्यवंशवृक्षस्य खण्ड: एव त्वं , ननु ? तव शरीरे किं सौन्दर्यम् अस्ति ? कति छिद्राणि सन्ति तव शरीरे ? एवं स्थिते अपि तव स्थानं श्रीकृष्णस्य अधरे वर्तते ? तस्मिन् मोहजालं प्रसारितं वा त्वया ? "

गोपिकानाम् एतानि कुत्सितवाक्यानि श्रुत्वा मम चित्तप्रसन्नता नष्टा न अभवत् । स्मयमाना अहं ताभ्य: प्रत्युत्तरं दत्तवती " भवत्य: मादृशा: एव भवन्तु , येन श्रीकृष्णस्य प्रीतिं प्राप्तुं शक्नुवन्ति ।"

ता: किमपि न अवगतवत्य: , मामेव दृष्टवत्य: । मया स्पष्टीकरणं कृतम् ...

" मां पश्यन्तु । अहम् अतीव सरला अस्मि । न कापि ग्रन्थि: अस्ति मम शरीरे , न कापि वक्रता ।अहं रिक्ता अस्मि । मम रिक्ततायाम् अहङ्कारस्य नाश: भवति । मम शरीरे सप्त छिद्राणि सन्ति । तेभ्यः काम: , क्रोध: , लोभ: , मोह: , मद: , मत्सर: एते षड्रिपव: तथा अतितृष्णा मया निष्कासिता: सन्ति । सप्तछिद्रेभ्यः त्यज्यमाना: असद्युक्ता: दोषा: दूरीभूय अहम् अतीव पवित्रं भवामि । मम स्वीय: कोऽपि रव: नास्ति । अत: अहं मौनम् आचरन्ती अस्मि । मम भगवान् यदा मयि वायुं पूरयति , तदैव मम रव: उद्भवति । वादनसमये सदैव भगवत: अधरस्पर्शं , चुम्बनं च अनुभवामि । किन्तु तत्र मम कापि शृङ्गारभावना वा वासना नास्ति । केवलं समर्पणभाव: तथा अव्यभिचारयुक्ता भक्ति: वर्तेते ।

मम अत्यल्पां सङ्गीतसेवां भगवते समर्प्य मम जीवने कृतार्थतां तथा धन्यताम् अनुभवामि ।

मम सारल्यं , ऋजुता , अहैतुकप्रीति: , अनन्यभक्तिभाव: , सर्वसमर्पणवृत्ति: एव मां भगवत: अतीव निकटे नयति ।

अहङ्काररहितं शरीरम् एव श्रीकृष्णस्य मुरली अस्ति ।

बालरञ्जनी

## रक्तमुखस्य उत्थानम्

**– शिल्पा मुद्गूर, मुम्बई**

रक्तमुखः आकाशम् अपश्यत् । सूर्यास्तसमयः आसीत् । तस्य वयस्याः उड्डयनं कुर्वन्तः आसन् । 'किम् अहं मम परिवारेण सह स्थलान्तरं गन्तुं शक्नोमि ?' इति चिन्तितं रक्तमुखेन । तस्य प्रियमित्रं हर्यक्षः समीपे स्थितः आसीत् । सः तम् अपृच्छत् - 'किं चिन्तयसि रक्तमुख ? अग्रिमे मासे मुम्बई-नगरं प्रति गन्तव्यं किल । प्रतिवर्षं शीतकाले तव सर्वे परिवार-सदस्याः मुम्बईनगरस्य समीपस्थं जलाढ्य-प्रदेशं गत्वा निवसन्ति ।'

रक्तमुखः – ' त्वमपि आगच्छ मया सह । '

हर्यक्षः – ' (हसित्वा) 'त्वं राजहंसः (फ्लेमिङ्गो खगः) । त्वम् अनायासेन उड्डीय सुदूरं गमिष्यसि । अहं तु कच्छपः, अपि च वृद्धः । न उड्डयनं कर्तुं शक्नोमि, न वा तरणं कृत्वा तावत् दूरं गन्तुम् इच्छामि । त्वम् ओक्टोबरमासे पुनः अत्र आगमिष्यसि किल ? '

रक्तमुखः – ' अहं त्वां विना कुत्रापि न गमिष्यामि । '



एवम् उक्त्वा रक्तमुखः शनैः खञ्जन् ततः निर्गतः । रक्तमुखस्य एकः पादः अन्यस्य अपेक्षया ह्रस्वः । खञ्जतायाः कारणेन सः अन्नस्य अन्वेषणे, क्रीडने च मित्राणाम् अपेक्षया मन्दः आसीत् । तस्य मित्राणि सर्वदा तस्य प्रोत्साहनं कुर्वन्ति स्म । तथापि 'अहं खञ्जचरणः, अतः यत् मम मित्राणि कर्तुं शक्नुवन्ति तत् सर्वम् अहं कर्तुं न शक्नोमि ।' इति सः दृढं मन्यते स्म । अतः सः उड्डयनस्य प्रयत्नम् अपि न कृतवान् ।

रक्तमुखस्य जन्म अभवत् गुर्जरप्रदेशे कच्छरणे । साधारणतया जूनमासतः ओक्टोबरमासपर्यन्तं कोटिशः राजहंसाः सपरिवारं कच्छरणे निवसन्ति । तत्र शावकानां जन्म भवति । राजहंसाः अवधानेन स्वशावकानां पालनं पोषणं च कुर्वन्ति । यदा शावकानां पक्षाः सम्यक् वर्धन्ते ते उड्डयनम् आरभन्ते । ओक्टोबरमासतः पुनः खगानां स्थलान्तरगमनं प्रारभते । ते समूहशः उड्डीय निवासाय अन्यत्र गच्छन्ति ।

रक्तमुखः उड्डयनाय न स्पृहयति इति दृष्ट्वा तस्य पितरौ अन्ये खगाः च चिन्ताक्रान्ताः अभवन् । एकस्मिन् दिने तस्य मित्रं भल्लाक्षः अकस्मात् रक्तमुखस्य समीपम् आगतवान् ।

भल्लाक्षः – (भयेन) 'मित्र रक्तमुख, हर्यक्षः सङ्कटे अस्ति । तस्य साहाय्यार्थं शीघ्रं गन्तव्यम् । '

रक्तमुखः – ' कुत्र अस्ति सः ?'

भल्लाक्षः – ' तत्र द्वीपे । शीघ्रं तत्र प्राप्तव्यम् । चिन्तनं कर्तुं समयः नास्ति । चल मया सह । '

इति उक्त्वा भल्लाक्षः उड्डयनाय सज्जः अभवत् । ततः अनतिदूरम् आसीत् एकः द्वीपः । 'मम प्रियः हर्यक्षः सङ्कटे अस्ति । तत्क्षणं द्वीपं प्रति गन्तव्यम् । ' इति चिन्तनेन शङ्कां सङ्कोचं च त्यक्त्वा रक्तमुखः भल्लाक्षम् अनु उड्डयनाय सज्जः अभवत् । क्षणान्तरे सः उत्थितः । अचिरात् आकाशे सहजतया प्लवनं कुर्वन् आसीत् रक्तमुखः ।

स्वल्पसमयात् उभौ तं द्वीपं प्राप्तौ । तत्र तटे अवतीर्य रक्तमुखः किम् अपश्यत् ? हर्यक्षः तत्र स्थित्वा सगर्वं तं पश्यन् आसीत् । अन्यमित्राणि च तस्य अभिनन्दनं कुर्वन्तः आसन् । तान् सर्वान् दृष्ट्वा रक्तमुखः ज्ञातवान् – 'मया उड्डयनं कर्तव्यम् अतः मम मित्रैः एषः उपायः कृतः' इति । उड्डयनस्य अनुभवेन तस्य मनः हर्षितम् । सः स्वग्रीवाम् उन्नीय स्थितवान् ।



चित्राणि – दया बाळे कोप्पीकर, न्यू जर्सी

तदा हर्यक्षः तस्य समीपम् आगत्य उक्तवान् – 'वत्स, एतत् सर्वदा स्मर । स्वस्य योग्यता न शङ्कितव्या । आत्मबलः वर्धयितव्यः । निजसामर्थ्यम् उपयोक्तव्यम् । तेनैव सफलता लभ्यते, जीवने उत्थानं शक्यं भवति ।'

## हास्यकणिका

**– सुजाता हळदीपुर , मुम्बई**

जनकः- विशाल, अद्य तव अम्बायाः स्वास्थ्यं सम्यक् नास्ति वा ? होराद्वयं सा किमपि न उक्तवती । किमर्थम् ? मूर्ख , किं कृतवान् त्वम् ??

विशालः- तात, चिन्ता मास्तु। स्वस्था अस्ति सा । सा ओष्ठरङ्गम् ( लिप्स्टिक ) इष्टवती। अहम् अनवधानेन तस्यै फेविस्टिक-लेपम् दत्तवान्।

जनकः- अत्युत्तमम्। शतायुषी भव। ईश्वरकृपया ईदृशः सुपुत्रः सर्वे लभेयुः।

## योजन-क्रीडा

देवता-वाहनयोः योजनं करोतु –







(उत्तराणि एकादशपृष्ठे दत्तानि )

## प्रतिध्वनिः

**– क्षमा फ्रान्सिस्, मुम्बई**

एकः बालकः एकदा तस्य जनकेन सह पर्वतारोहणं कर्तुं गतवान् । तदा अकस्मात् बालकस्य पादः अस्खलत् सः अपतत् च। सः उच्चैः "आ ऽ ऽ ऽ" इति आक्रोशत् । कियत् आश्चर्यम् । सः झटिति पर्वतात् "आऽऽऽ" इति ध्वनिं श्रुतवान् । सः अत्यन्तं कुतूहलेन उच्चैः आक्रोशत् " त्वं कः?"

सः झटिति उत्तरं श्रुतवान् " त्वं कः"?

बालकः अकुप्यत् , उच्चैः आक्रोशत् च " त्वं भीरुः " इति । पुनः सः शब्दौ श्रुतवान् , " त्वं भीरुः" इति । बालकः आश्चर्येण जनकस्य मुखम् अपश्यत् अपृच्छत् च " किं भवति अत्र ? " इति । " पुत्र ! अवधेयम् " इति उक्त्वा जनकः अपि उच्चैः आक्रोशत् " अहं त्वां प्रशंसामि " इति । स्वररूपेण सः पर्वतात् उत्तरं श्रुतवान् "अहं त्वां प्रशंसामि " इति । जनकः पुनः उच्चैः अवदत् " त्वं विस्मयकारकः " इति । पुनः स्वररूपेण उत्तरं श्रुतवान् " त्वं विस्मयकारकः " इति । बालकस्य आश्चर्यं द्विगुणितम् अभवत् तथापि सः अवगन्तुं न शक्तवान् । जनकः स्नेहेन बालकम् आलिङ्ग्य स्पष्टीकरणम् अकरोत् - ," जनाः तं " प्रतिध्वनिः" इति वदन्ति । किन्तु एकं सत्यम् अपि वदामि , शृणु - जीवनम् अपि प्रतिध्वनिः इव । त्वं यत् ददासि तत् प्राप्यसि । जीवनं तु मनुष्यस्य कर्मणः दर्पणः इव । त्वं यदि स्नेहम् इच्छसि तर्हि अधिकं स्नेहं देहि । यदि दयाम् इच्छसि तर्हि अधिकां दयां दर्शय । यदि सहानुभूतिम् आदरं च इच्छसि तर्हि अधिकां सहानुभूतिम् आदरं च दर्शयितुं प्रयत्नं कुरु ।

एवं तव जीवने प्रतिध्वन्याः चयनं सावधानेन कुरु । "

# पेडोञ्ज्री- वीरचक्रपुरस्कृता वेसरी

– सुधा भट कल्याणपुर , मङ्गळूरु

भारतीय-सेनादलस्य व्यतिरिक्तं प्रायः कोऽपि न जानाति यत् सामान्यसेवायाः एका पेडोञ्ज्री नाम्ना वेसरी वीरचक्रस्य गौरवं प्राप्तवती इति । पेडोञ्ज्री देशस्य सीमारेखायां भारतीयसेनायाः कृते वस्तु-परिवहनस्य कार्ये रता वेसरीषु एका ।

१९७१ तमे भारत-पाकिस्तान-युद्धसमये जम्मू - काश्मीर - विभागे एकस्य पशु- परिवहनस्य उपरि पाकिस्तान-सेनया भू-आक्रमणं कृतम् । प्रशिक्षणविधान-अनुसारेण चालकाः पशून् विकीर्य शत्रूणां गोलवर्षायाः गुप्ताः जाताः। तैः सह भवन्ती सेना प्रत्याक्रमणं कृतवती ।

आक्रमणस्य अनन्तरं पशूनां सङ्ग्रहणसमये तिसृणां वेसरीणाम् अनुपस्थितिं ते चालकाः ज्ञातवन्तः । ताः वेसर्यः पाकिस्तानसैनिकैः नीताः आसन् । पशूनां प्रशिक्षणं पाकिस्ताने तथा भारते समानम् अस्ति इति ते पाकिस्तानीयोद्धारः ज्ञातवन्तः । तत्रापि एताभिः वेसरीभिः तादृशानि एव कार्याणि कारितानि ।

अनेकदा अस्माकं सेना अपि ईदृशं कार्यं करोति । प्रायः जल-पूरणं , वस्तु-परिवहनं इत्यादि कार्याणि पेडोञ्ज्री अपि कुर्वती आसीत् पाकसेनायाः कृते ।

प्रायः सप्ताहद्वयानन्तरं पेडोञ्ज्री भारतीयसेनायाः स्वस्य गणस्य पुरतः स्थिता आसीत् । तस्याः पृष्ठभागे आसीत् रज्ज्वा बद्धं स्फोटकास्त्राणाम् पेटिकाद्वयम् ।

एतत् स्पष्टं यत् सा पाक- सैनिकानां दृष्ट्याः अगोचरा भूत्वा कथमपि स्वस्थानं प्राप्तवती।

ईदृशं श्रान्ता पेडोञ्ज्री स्फोटकास्त्र- पेटिके वहन्ती २०-२५ कि. मी. दूरं धावन्ती आगतवती । तस्याः मार्गमध्ये भूमौ स्फोटकास्त्राणि गोपयितानि आसन् । परन्तु सा सर्वाः बाधाः उल्लङ्घ्य भारतसीमारेखाम् अतिक्रम्य स्वस्थानं प्राप्तवती।

तस्याः एतस्याः नितान्त-धीरतायाः कृते (Divisional Commander) सेनायाः विभागमुख्यः सेनापतेः समीपं पेडोञ्ज्याः नाम पुरस्काराय सूचयितुं प्रोक्तवान्। तथैव पेडोञ्ज्यै वीरचक्रं प्रदत्तम् ।

तदनन्तरं पेडोञ्ज्री सर्वेभ्यः कार्येभ्यः निवृत्तिं प्राप्तवती। उपजीवनार्थं केवलं भोजनपानं तथा स्वैरसञ्चारं कृतवती आसीत् सा । तस्याः पालकः तस्याः पोषणम् आजीवनं कुर्वन् आसीत् । पेडोञ्ज्री १९७८ तमे वर्षे मरणं प्राप्तवती।

एतस्याः घटनाविषयं कोऽपि परीक्षितुं शक्नोति । ASC Centre and College बेङ्गलूरु-भवने अस्याः वीरचक्रपदकं , प्रशस्तिपत्रं तथा एकं भावचित्रं च दृश्यन्ते ।

## उत्तराणि

**योजन-क्रीडा**

शिवः - वृषभः , विष्णुः – गरुडः , लक्ष्मीः – उलूकः , सरस्वती – हंसः , कार्तिकेयः – मयूरः , इन्द्रः – गजः

# सुभाषितानि

**– कृष्णानन्द मङ्कीकर , मुम्बई**

संस्कृतभाषा अतीव सौन्दर्यवती। तस्याः सौन्दर्यं विविधैः अलङ्कारैः वर्धितम् । यथा शब्दालङ्काराः, अर्थालङ्काराः इत्यादयः काव्ये गद्यग्रन्थेष्वपि, तथैव, वयम् अन्यान् अलङ्कारान् अपि संस्कृतसाहित्ये पश्यामः यैः गीर्वाणभाषा मण्डिता । यथा सुभाषितानि, अन्योक्तयः, व्याजोक्तयः इत्यादयः ।

एतेषु अलङ्कारेषु सुभाषितानां स्थानम् अनन्यसाधारणम् । सुष्ठु उच्यते,

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञाऽभिधीयते ॥**

सुभाषितानि एकपङ्क्तियुक्ताः द्विपङ्क्तियुक्ताः अथवा चतुष्पङ्क्तियुक्ताः श्लोकाः अथवा गद्यवाक्यानि सन्ति।

संस्कृतसाहित्ये न केवलं स्वतन्त्राणि रचितानि सुभाषितानि (यानि मुक्तक इति नाम्नापि ज्ञातानि) यथा भर्तृहरिकृते नीतिशतके, अपि तु महाकवीनां कृतिषु अपि सुभाषितसदृशाः श्लोकाः वाक्यानि च सन्ति । यथा, मेघदूते कालिदासेन लिखितं "याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ।" अधिगुणे इति श्रेष्ठतमे पुरुषे कृता याञ्चा – प्रार्थना याचना वा, यदि मोघा – निष्फला भवति तदा वरं, -- युक्तं उचितं वा । न तु सफला याचना कृता अधमे जने इति। नीचं प्रति साहाय्यार्थं न गन्तव्यम् इति भावः।

सुभाषितानि प्रायः मनुष्यस्वभावं चित्रीकुर्वन्ति। तथा च, गुणान् प्रशंसन्ति वा दोषान् निन्दन्ति । अथवा कानिचित् सुभाषितानि विनोदपूर्णानि । देवीदेवतानामुपरि मनुष्यस्वभावं स्थापयित्वा वर्णयन्ति यथा--

**कमले कमला शेते हरश्शेते हिमालये ।**
**क्षीराब्धौच हरिश्शेते मन्ये मत्कुणशङ्कया ॥**

अथवा--

**असारे खलु संसारे, सारं श्वशुरमन्दिरम् ।**
**हिमालये हरश्शेते, हरिश्शेते पयोनिधौ ॥**

मानवसमाजे प्रचलिताः अनेकाः वृत्तयः अपि सुभाषितेषु वर्णिताः भवन्ति।

सुष्ठु एव उक्तमेकेन कविना --

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।**
**तत्रापि काव्यं मधुरं काव्येऽपि च सुभाषितम् ॥**

अनेकाः प्रहेलिकाः, अन्योक्तयः, व्याजोक्तयः लोकोक्तयः रत्नानि इव वर्तन्ते गीर्वाणभाषासागरे। तानन्वेष्टुं किञ्चित् प्रयत्नं तथा बह्वी अभिरुचिरेव आवश्यकी । "सुभाषितरत्नभाण्डागार" पुस्तके १०,००० उपरि सूक्तयः सन्ति। इदमन्तर्जालेऽपि उपलब्धमस्ति। तत्पश्यन्तु ।

यथावकाशं विषयानुसारं सुभाषितानि , प्रहेलिकाः, समस्यापूर्तीः विनोदपूर्णोक्तीः इत्यादीः पश्यामः ।

इत्यलम् । शुभं भवतु ।

दीर्घा कथा

# दर्शनम्

( उत्तरार्धः )

- **सुमन हिरेबेट् , बेङ्गलूरु**

( महेशरावः तथा गौरी अमेरिकातः आगतेन एकमात्रपुत्रेणसह श्रीशैलक्षेत्रं प्राप्तौ । तदा एकः वृद्धः देवदर्शनार्थं पङ्क्त्यां स्थितमहेशरावस्य समीपम् आगत्य तान् स्वस्य भाटककक्षम् आगन्तुं प्रार्थितवान् । अग्रे किं भवति पठन्तु।)

तदनु ते सर्वे वृद्धस्य कुटीरं प्राप्ताः । सः वृद्धः तान् सर्वान् दीर्घासन्दे उपवेश्य स्थालिकायां कदलीफलानि आनीय, " कृपया स्वीकुर्वन्तु " इति उक्तवान् । ततः सः पुनः , "भवन्तः सर्वे मम वचनैः आश्चर्यान्विताः स्युः । दशवर्षपूर्वे आवां स्वपुत्रेण सह एतत् क्षेत्रम् आगतवन्तौ । ततः सः विदेशं गत्वा विशेषाभ्यासं कृत्वा उत्तमम् उद्योगमपि प्राप्य कामपि विदेशीयां परिणीय तत्रैव स्थितः । न वा पुनः आगतवान् । न वा दूरवाणीमपि करोति " । इति वदन् सः भावपूर्णः जातः । अश्रुपूर्ण-नेत्राभ्यां सः अग्रे उक्तवान् " भवान् रूपेण वा व्यक्तित्वेन वा साक्षात् मम पुत्रः इव दृश्यते अतः भवता सह किञ्चित् समयं व्यतीतं कर्तुम् इष्टवान् । अत्र आगमनार्थं भवते प्रभूताः धन्यवादाः । " महेशरावः उत्थाय तस्य समीपं गत्वा सान्त्वनं कृतवान् । किञ्चित् समयं तेन सह यापयित्वा सपरिवारं ततः निर्गतः।

पुत्रवसन्तेन सह नानाविध-तीर्थक्षेत्र-दर्शनेन महेशरावः सन्तुष्टः जातः किन्तु सः तत्वृद्धस्य पुत्रवियोगं विस्मर्तुं न शक्तवान् ।

एकमासादनन्तरं यदा पुत्रः वसन्तः अमेरिकां गन्तुम् उद्युक्तः तदा भक्तिपूर्वकं मातापित्रोः पादस्पर्शं कृत्वा नमस्कृतवान् । तदा तयोः मनसि श्रीशैलक्षेत्रे मिलितस्य वृद्धस्य दैन्यचित्रं समागतम् । मनः कम्पितं च ।

क्षणाभ्यन्तरे पुत्रः वसन्तः – " हे पितः , हे मातः ! अहं श्रीशैलक्षेत्रदर्शनं सदा स्मरामि । यतः तत्र न केवलं श्रीमल्लिकार्जुनदेवस्य दर्शनभाग्यं प्राप्तम् अपि तु मातापित्रोः निर्व्याज्य-वात्सल्यदर्शनम् अपि प्राप्तम् । मया हरितपत्रम् ( Green Card ) अपेक्षितम् अस्ति किन्तु तत्वृद्धस्य पुत्रः इव अहं कदापि न व्यवहरामि । भवद्भ्यां प्राप्तसंस्कारान् स्नेहं च अहं कदापि न विस्मरामि । " इति उक्त्वा तौ भावोद्वेगेन आलिङ्गितवान् ।

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**संस्कृताध्ययनार्थं जालाधारित-प्रबोधवर्गस्य (online classes) पञ्जीकरणार्थं सम्पर्कः -**
**Email id: prabodhah@chitrapurmath.net.in**